'तिङश्च' (५.३.५६/२००२) इत्यनुवर्तते। [1]पचतिरूपम्। [2]पचतोरूपम्। पचन्तिरूपम्। क्रियाप्रधानमाख्यातम्। एका च क्रिया इति रूपप्प्रत्ययान्ताद् द्विवचनबहुवचने न भवतः। नपुंसकलिङ्गं तु भवति, लोकाश्रयत्वाल्लिङ्गस्य॥

## ईषदसमाप्तौ कल्पब्देश्यदेशीयरः। (६७/२०२२)

सम्पूर्णता [3]पदार्थानां समाप्तिः। स्तोकेनासम्पूर्णता ईषदसमाप्तिः। प्रकृत्यर्थविशेषणं चैतत्।। ईषदसमाप्तिविशिष्टेऽर्थे वर्तमानात् प्रातिपदिकात्[4] कल्पप् देश्य देशीयर् इत्येते प्रत्यया भवन्ति। ईषदसमाप्तः पटुः पटुकल्पः, पटुदेश्यः, पटुदेशीयः। मृदुकल्पः, [5]मृदुदेश्यः, मृदुदेशीयः। 'तिङश्च' (५.३.५६/२००२) इत्येव, पचतिकल्पम्। जल्पतिकल्पम्[6]॥

## विभाषा सुपो बहुच् पुरस्तात्तु। (६८/२०२३)

ईषदसमाप्तिविशिष्टेऽर्थे वर्तमानात् [7]सुबन्तात् विभाषा बहुच् प्रत्ययो भवति। स तु पुरस्तादेव भवति, न परतः। चित्करणमन्तोदात्तार्थम्। ईषदसमाप्तः पटुः बहुपटुः। बहुमृदुः। बहुगुडो द्राक्षा। [8]विभाषावचनात् कल्पबादयोऽपि भवन्ति[9]। सुब्ग्रहणं तिङन्तान्मा भूदिति॥

## प्रकारवचने जातीयर्। (६९/२०२४)

सामान्यस्य भेदको विशेषः प्रकारः, तस्य वचने। [10]प्रकृत्यर्थविशेषणं चैतत्। सुबन्तात् प्रकारविशिष्टे[11]ऽर्थे वर्तमानात् प्रातिपदिकात् [12]स्वार्थे जातीयर् प्रत्ययो भवति। प्रकारवति चायं [13]प्रत्ययः। [14]थाल् पुनः [15]प्रकारमात्र एव भवति। पटुप्रकारः पटुजातीयः। मृदुजातीयः। दर्शनीयजातीयः[16]॥

## प्रागिवात् कः। (७०/२०२५)

'इवे प्रतिकृतौ' (५.३.९६/२०५१) इति वक्ष्यति। प्राक् एतस्मादिवसंशब्दनाद् [17]यानित ऊर्ध्वमनुक्रमिष्यामः कप्रत्ययस्तेषु[18]अधिकृतो वेदितव्यः। वक्ष्यति – 'अज्ञाते' (५.३.७३/२०२८) [19]इति। अश्वकः। गर्दभकः। तिङन्तादयं [20]प्रत्ययो नेष्यते, अकजिष्यते। 'तिङश्च' (५.३.५६/२००२) इत्यनुवृत्तमुत्तरसूत्रेणैव [21]सम्बन्धनीम्॥

---

1. पिबतिरूपम् क, पचन्तिरूपम् ह. 2. नास्ति ब. 3. अर्थानां ह. 4. स्वार्थे इत्यधिकम् क. ड. फ. 5. मृदुदेश्यः मृदुदेशीयः नास्ति फ. 6. णचः स्त्रियाम् इति स्त्रीग्रहणं ज्ञापकम्, स्वार्थिकाः प्रकृतितः लिङ्गवचनान्यनुवर्तन्ते इत्यधिकम् ह. 7. प्रातिपदिकात् फ. 8. विभाषाग्रहणात् क. 9. पटुकल्पः मृदुकल्पः इत्यधिकम् क. 10. प्रकृति नास्ति क. ड. फ. ह. 11. अर्थे नास्ति फ. 12. स्वार्थे नास्ति फ. 13. इष्यते फ, इष्यते। थालपि। सादृश्यमेव लक्षणम्। स तु प्रकारमात्रे भवति। जातीयर् तद्वति वर्तमानात् इत्यधिकम् ग. 14. थाल् प्रत्ययः क. ह. 15. प्रकार एव 16. शोभनजातीयः इत्यधिकम् क.ड. 17. यानर्थान् इत ड.ह. 18. अर्थेषु इत्यधिकम् ह. 19. कुत्सिते च इत्यधिकम् क. 20. कप्रत्ययः क. 21. सम्बन्धं नीयते क, सम्बध्यते ह.